दिनाङ्क :- 13.08.2026

प्रात: - 06:55

## संसद्-विधेयकम्

संसदा राष्ट्रिय-सहकारी-विकास-निगम-विधेयकम् षड्विंशत्यधिक-द्विसहस्रतमं सर्वसम्मत्या पारितम्। अनेन विधेयकेन निगमाय स्वकीयानि कार्याणि औद्योगिक-पण्येषु अपि विस्तारयितुम् अनुमन्यते, अथ च राज्य-सर्वकाराः सहकारिता-विकास-कार्ये संस्थापिताय कस्मैचित् अपि निकायाय अस्याः संस्थायाः वित्तीय-साहाय्यम् दातुम् अधिकृताः। एतदतिरिच्य, संसदा संविधानस्य प्रथम-अनुसूच्याम् केरल इति राज्यस्य नाम परिवर्त्य केरलम् इति विधातुम् केरल-नाम-परिवर्तनविधेयकम् षड्विंशत्यधिक-द्विसहस्रतमं अपि स्वीकृतम्। अपरतः, वैदेशिक-अनुदानानाम् उपयोगम् अधिकाधिकं पारदर्शिकम् उत्तरदायित्वपूर्णं च विधातुम्  नीतम् वैदेशिक-अंशदान-संशोधन-विधेयकम् षड्विंशत्यधिक-द्विसहस्रतमं विस्तृत-सूक्ष्म-परीक्षणार्थम् संयुक्त-संसदीय-समितये प्रेषितम्।

## किरेन रिजिजुः

संसदीय-कार्यमन्त्री किरण-रिजिजुः अवदत् यत् गृहमन्त्री अमित-शाहः लोक-सभा-अध्यक्षाय ओम बिरला-महोदयाय पत्रं लिखित्वा नीट्'-प्रश्नपत्र-गोप्यताभङ्ग-विषये प्रदर्शन-काले घटितानां विविधानाम् घटनानाम् उपरि पुनः एकवारम् विस्तृत-चर्चायै स्वकीयां सम्मतिं प्राकटयत्। संसद्-परिसरे पत्रिकारैः सह सम्भाषमाणः मन्त्री अकथयत्

यत् सर्वकारः स्वयं वदति यत् सः चर्चायै सन्नद्धः अस्ति तथा च प्रश्नानाम् उत्तराणि दास्यति, किन्तु विपक्षः उत्तराणि श्रोतुम् न वाञ्छति, चर्चायाश्च पलायनं करोति ।

<u>रेलविभागस्योपरि-सेतु-परियोजना ::</u>

भारतीय-रेल-विभागेन पश्चिम-रेल-विभागस्य गेरातपुर-अहमदाबाद-खण्डे चतुर्-मार्गीय-उपरिसेतोः निर्माणार्थं त्रिपञ्चाशदधिक-शतकोटि-रुप्यकाणां परियोजना स्वीकृता अस्ति। रेल-मन्त्रालयेन सूचितं यत् एषा परियोजना पश्चिम-रेल-विभागस्य अम्ब्रेला वर्क' इत्याख्यस्य 'छत्रक-कार्यक्रमस्य अन्तर्गतं मार्गीय परिष्कारार्थं सेतूनां पुनर्निर्माणार्थं स्वीकृता अस्ति। मन्त्रालयेन उक्तं यत् रेलसेतुभागस्य समग्रा दीर्घता षडधिक एकशत-मीटर मिता भविष्यति। अस्मिन् त्रि-पञ्चाशत्-मीटर् परिमितं प्रत्येकमपि द्वौ संयुक्त-गिडर्-भागद्वयं समाविष्टमस्ति।

<u>हर घर तिरङ्गा'</u>

हर घर तिरङ्गा' इत्यभियानस्य भागरूपेण जम्मू-कश्मीरस्य रियासी-मण्डल-प्रशासनेन जनसामान्यानां हृदयेषु देशभक्ति-भावनायाः संवर्धनाय चिनाब-नद्याम् एका विशाल-तिरङ्गा-नौका-यात्रा  योजिता। स्वतन्त्रता-दिवसात् पूर्वम् एतत् अभियानं समग्रे देशे तीव्र-गतिं भजते, यत्र विविध-प्रदेशेषु देशभक्ति-पूर्ण-यात्राणां , सांस्कृतिक-कार्यक्रमाणाम् अन्येषां च विविधानाम्  योजनानां उत्सवः  चर्यते।

**ऋतु विभागः**

भारत-ऋतु-विभागेन उत्तर-बङ्गाल-खात्याः उपरि न्यून-चाप-क्षेत्रस्य निर्माणस्य पूर्वानुमानं प्रकटितम् अस्ति, येन अद्य ओडिशा-राज्ये, गाङ्गेय पश्चिमबङ्गालप्रदेशे च अत्यधिकवृष्टिः भवितुम् अर्हति। ऋतुविभागः अवदत् यत् दिने कर्णाटक-पूर्वी-उत्तरप्रदेश-गुजरात-तमिलनाडु-करैकल-पुदुचेरी-अण्डमान्-निकोबार्-द्वीप, केरलम-गोवा-राजस्थानेषु चापि प्रचण्डवृष्टिः भवितुम् अर्हतीति।

**राष्ट्रमण्डल क्रीडा:**

ह्यः नाइजीरिया-देशस्य लागोस-नगरे कामन्वेल्थ-चैम्पियन्शिप-क्रीडायाः तृतीयदिने भारतीय-फेन्सिङ्ग-इत्यनेन दलेन विभिन्नेषु वरिष्ठ-व्यक्तिगत-स्पर्धासु त्रीणि स्वर्णपदकानि, एकं रजत-पदकं, एकं कांस्यपदकं च प्राप्तम्। अनेन सहैव भारतीय दलस्य समग्र-पदक-सङ्ख्या एकोनत्रिंशत् यावत् वर्धिता, येषु अष्ट-स्वर्णपदकानि, सप्त रजतपदकानि, चतुर्दश कांस्यपदकानि च सम्मिलितानि सन्ति।